**केन्द्रीयविद्यालय संगठनम्-चेन्नै संभाग:**

द्वितीयपूर्वपरीक्षा 2025-26

**प्रश्नपत्रम्**

**कक्षा- दशमी** **संस्कृतम् (सम्प्रेषणात्मकम्)** **(कोड्-संख्या -119)**

**समय: - 3 होरा:** **पूर्णाङ्का: -80**

**सामान्यनिर्देशा:**

1.कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 14 पृष्ठानि मुद्रितानि सन्ति।

2. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 18 प्रश्ना: सन्ति।

3. अस्मिन् प्रश्नपत्रे चत्वार: भागा: सन्ति।

| | | | |
|---|---|---|---|
| **'क' भागः** | : | **अपठितावबोधनम्** | **10 अङ्का:** |
| **'ख' भागः** | : | **रचनात्मककार्यम्** | **15 अङ्का:** |
| **'ग' भागः** | : | **अनुप्रयुक्तव्याकरणम्** | **25 अङ्का:** |
| **'घ' भागः** | : | **पठितावबोधनम्** | **30 अङ्का:** |

4. प्रत्येकं भागम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।

5. उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमाङ्क: अवश्यं लेखनीय:।

6. प्रश्नस्य क्रमाङ्क: प्रश्नपत्रानुसारम् एव लेखनीय:।

7.सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।

8.प्रश्नानां निर्देशा: ध्यानेन अवश्यं पठनीया:।

## 'क' भागः

## अपठितावबोधनम् (10 अङ्का:)

**1.अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत-** 10

अद्यतन-तन्त्रज्ञानयुगे भारतदेशे "डिजिटल् इण्डिया" इति महत्त्वपूर्णं राष्ट्रीयम् अभियानं प्रचलति। अस्य अभियानस्य मुख्यलक्ष्यं देशस्य नागरिकान् आधुनिक-तन्त्रज्ञानस्य लाभैः सह संयोजयितुम्, सेवाप्रदानस्य पारदर्शितां वर्धयितुं, शासनकार्यस्य वेगं सम्यक् विस्तारयितुं च अस्ति। अस्याः योजनायाः प्रभावेन सामान्यजनाः शासनस्य सेवाः, वित्तीय-व्यवहाराः, आरोग्य-सूचनाः, शैक्षिकसामग्री च सहजतया प्राप्नुवन्ति। ई-शासनम् इत्यस्य प्रवर्तनं देशे कार्यक्षमतां संवर्धयति,

कारणं यत् प्रायः सर्वे कर्गदपत्राणि, प्रमाणपत्राणि, आवेदन-प्रक्रियाश्च ऑनलाइन-रूपेण साधयितुं शक्यन्ते। ई-शिक्षणस्य माध्यमेन ग्रामीण-नगरपालिक-विद्यालयानां विद्यार्थिनः अपि उच्चगुणवतां शिक्षां इंटरनेट्-द्वारा प्राप्तुं शक्नुवन्ति। उद्यमशीलतायां च डिजिटल्-व्यापाराणां, ऑनलाइन-विपणनस्य च प्रसारः युवकानां कृते आर्थिक-सशक्तीकरणाय योगदानं करोति। कृषकाः अपि वातावरणसूचनाः, मूल्यसूचयः, अनुदानसम्बद्धा ज्ञापनानि च स्वस्मात् मोबाइल्-साधनात् एव अवगच्छन्ति। एवं "डिजिटल् इण्डिया" अभियानं केवलं तन्त्रज्ञानस्य विकासः न, अपि तु सर्वजनहिताय देशस्य उज्ज्वलभविष्यस्य आधारशिला इव दृश्यते।

**अ. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)** **1×2=2**

(i) राष्ट्रीय-अभियानस्य नाम किम्?

(ii) "डिजिटल् इण्डिया" अभियानं का इव दृश्यते?

(iii) अद्यतन-युगं कीदृशम् अस्ति?

**आ. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)** **2×2=4**

(i) "डिजिटल् इण्डिया" इत्यस्य मुख्यलक्ष्यं किम्?

(ii) सामान्यजना: "डिजिटल् इण्डिया" प्रभावेन किं किं प्राप्नुवन्ति ?

(iii) क: युवकानां कृते आर्थिक-सशक्तीकरणाय योगदानं करोति ?

**इ. अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत।** **1**

**ई. यथानिर्देशम् उत्तरत -** **1×3=3**

(i) "देशस्य उज्ज्वलभविष्यस्य आधारशिला इव दृश्यते" - अस्मिन् वाक्ये किं क्रियापदम् अस्ति?

(क) देशस्य (ख) इव

(ग) दृश्यते (घ) आधारशिला

(ii) 'अभियानम्' - अस्य विशेष्यपदस्य विशेषणपदं किम्?

(क) राष्ट्रीयम् (ख) युगे

(ग) शिला (घ) कृषका:

(iii) 'छात्रा:' इत्यस्य पर्यायपदं गद्यांशे किं प्रयुक्तम्?

(क) सामान्यजना: (ख) विद्यार्थिन:

(ग) अपि तु (घ) प्रसार:

## 'ख' भागः

## रचनात्मककार्यम् (15 अङ्का:)

**2. भवती सरस्वती । भवत्या: चयनं केन्द्रीयविद्यालाय-चेन्नई नगरे अद्यापिकारूपेण अभवत्| नूतनवातावरणस्य विषये पितरं प्रति लिखितं पत्रं मञ्जूषात: पदानां सहायतया पूरयित्वा उत्तरपुस्तिकायां पुन: लिखत- ½×10=5**

(i)......................

दिनांक:

प्रिय पित:!

(ii)...................,

अहं अत्र कुशलिनी अस्मि| भवान् अपि कुशली इति मन्ये| अहं चेन्नई नगरे मम (iii).......................विषये पत्रं लिखामि। अहं सुखेन अस्मि, भविष्यामि च। जम्मूतः प्रस्थाय (iv)............कैंद्रीयविद्यालये नूतनशिक्षिकारूपेण कार्यारम्भं कृतवती अस्मि। अत्र आगत्य बहवः नूतनाः अनुभवाः मया प्राप्ताः। चेन्नै-नगरं विशालं, सुशोभनं, अत्यन्तं व्यस्तं च अस्ति। अत्र जनाः विनीताः, सहायतापराः, स्नेहपूर्वक-व्यवहारिणश्च भवन्ति। विद्यालयेऽपि सहकर्मिणः हर्षेण मम स्वागतं (v).............। छात्राः अनुशासनेन, सामर्थ्येन च उत्तमाः सन्ति।(vi)..................... सुरक्षितं,आवश्यकसुविधायुक्तं च अस्ति। भोजनं अपि (vii)............, विशेषतया मया प्रथमवारं दाक्षिणात्य-(viii)............... आस्वादितानि। पितः! भवतः आशीर्वादैः अहं सर्वं सुखम् अनुभवामि। कृपया मातरं, भ्रातॄन्, सर्वान् च मम (ix)................निवेदयतु। धन्यवाद:!


भवत: प्रिया

(x).................

मञ्जूषा

| |
|---|
| नूतन-वातावरणस्य ,सप्रेमनमस्ते ,चेन्नईतः, प्रणामान्, निवासस्थानं, स्वादु, चेन्नै-नगर्यां, कृतवन्तः, सरस्वती , भक्ष्याणि |

**3. प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्चवाक्यानि संस्कृतेन लिखत-** **1×5=5**



मञ्जूषा

| |
|---|
| राजमार्गः , वाहनानि , जनाः , भवनानि , आयान्ति , विद्युत्स्तम्भः , यातायात-संकेत-दीपः ,प्रदूषणम् , नगरम् , व्यस्ताः , सन्ति , आपणानि , विकासः , रात्रिन्दिवम् , वेगेन |

अथवा

**मञ्जूषायां प्रदत्तशब्दानां सहाय्येन निम्नलिखितं विषयम् अधिकृत्य पञ्चभिः संस्कृतवाक्यैः एकम् अनुच्छेदं लिखत-** **1×5=5**

"नारी-शक्तिः"

मञ्जूषा

| |
|---|
| प्राचीनकाले , विद्यायुक्ताः , नारीणाम् , माता , भगिनी , पुत्री , स्वकर्तव्यम् , समर्था , प्रसवसमये , पुत्राणाम् , वीरजननी , वर्तमाने , सर्व-क्षेत्रेषु , स्त्रीणां स्थानम् , पुत्रीं रक्ष पुत्रीं पाठय |

**4. अ) मञ्जूषाप्रदत्तपदैः रिक्तस्थानानि पूरयित्वा अधोलिखितसंवादं पुनः लिखत-** **1×5=5**

अध्यापिका- भो विद्यार्थिनः! अद्य कस्मिन् विषये चर्चां कुर्मः?

सुरेशः -आचार्ये! ..............................................................|

अध्यापिका- 'ईबी-एसबी' नाम "एकभारतम् श्रेष्ठभारतम्" इति सर्वकारेण आयोजितः कार्यक्रमः।

नरेशः - .............................................?

अध्यापिका: - अस्य उद्देश्यः .........................................................। एवं राज्यानां राज्यैः सह योजनां कृत्वा परस्परं संस्कृतयः ज्ञायन्ते।

दिनेशः:- आचार्ये! विद्यालये कथं एतस्य कार्यक्रमस्य पालनं भवति?

अध्यापिका - वयं भाषाशिक्षणेन, ................................................च क्रियाकलापान् कुर्मः।

उमेशः - अत्र संस्कृतिः एव न, अपितु मित्रता अपि वर्धते |

अध्यापिका - सत्यम्! 'ईबी-एसबी' कार्यक्रमः भारतीयानां एकताभावं, परस्परं सम्मानं च दृढीकुरुते।

विद्यार्थी - अधुना अहं स्पष्टरूपेण अवगतवान्–भारतस्य विविधता एव तस्य शक्तिः।

अध्यापिका -................................................|

मञ्जूषा

| |
|---|
| आम्! विविधता-एकता च 'ईबी-एसबी' कार्यक्रमस्य मूलं अस्ति। |
| मम जिज्ञासा अस्ति 'ईबी-एसबी' इति किमर्थं भवति? |
| नृत्यगीतप्रदर्शनैः, भोजनपरंपरायाः अध्ययनेन, जनपद-परिधान-परिचयेन |
| भारतस्य विविधसंस्कृतिषु एकतायाः सौहार्दस्य च संवर्धनम् अस्ति| |
| अस्य कार्यक्रमस्य मुख्यः उद्देश्यः कः? |

अथवा

**आ) मञ्जूषायाः सहायतया अधोलिखितां कथां पूरयित्वा पुनः लिखत- ½×10=5**

एकस्मिन् (i).......... गणेशः नाम एकः (ii)...........बालकः वसति स्म । सः अतीव सत्यवादी आसीत्। एकदा सः नद्याः तीरे क्रीडन् आसीत्, तदा तेन एकः लघुः, प्रकाशमानः (iii)........दृष्टः । सः न ज्ञातवान् यत् तत् वज्रम् अस्ति। सः तम् स्वीकृत्य स्ववस्त्रस्य कोशे (iv) .............। तस्मिन् एव समये, तस्य ग्रामस्य धनिकः स्वस्य (v)...........हीरकमौक्तिकं नद्यां त्यक्तवान् , सः तस्याः अन्वेषणं कुर्वन् आसीत् । सः अतीव खिन्नः आसीत् तथा ग्रामे सर्वत्र नष्ट-मौक्तिकस्य विषये घोषणां कृतवान् । "यदि कश्चित् मौक्तिकं (vi)............. ददाति, तर्हि तस्मै महत् पारितोषिकं दीयते," इति उक्तवान् । गणेशः गृहं गत्वा तां(vii) .............अश्रृणोत् पाषाणस्य विषये च अस्मरत्। सः तत् स्वीकृत्य धनिकस्य समीपं धावितवान्

उक्तवान् च "(viii)..........!, मया नद्यां इदं प्राप्तम् । किं इदं भवतः वज्रम्?" इति विनयेन पृष्टवान् । धनिकः तत् वज्रं दृष्ट्वा अतीव (ix)............अभवत् । तत् स्वस्य वज्रम् इति निश्चितवान् । सः अतीव प्रसन्नः भूत्वा, प्रतिज्ञानुसारं गणेशाय महत्(x) ...........दत्तवान् ।

मञ्जूषा

| |
|---|
| पाषाणः ,अन्विष्य ,संतुष्टः, ग्रामे ,घोषणाम् ,<br>अमूल्यं ,स्थापितवान् ,पारितोषिकं ,निर्धनः, आर्य , |

**'ग' भागः**

अनुप्रयुक्तव्याकरणम् (25 अङ्काः)

**5(अ) अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं/सन्धिच्छेदं वा कुरुत- 1×4=4**

i. **<u>पदच्छेदस्तु</u>** पाठकगुणेषु एकः भवति ।

ii. शक्रः **<u>तत्र + एव</u>** अन्तर्हितः ।

iii. आयुषः **<u>एकोऽपि</u>** क्षणः अति महत्त्वपूर्णः ।

iv. यत्र गृहे कलहः भवति **<u>तत् + गृहं</u>** बुद्धिमान् त्यजेत् ।

**अथवा**

**(आ) अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं/सन्धिच्छेदं वा कुरुत**

<u>i. विधात्रा + एव</u> अहं पक्षिराजः कृतः।

ii. <u>ततो महीपालः</u> एकं चक्षुः प्रीत्या याचकाय दत्तवान्।

iii. <u>शीतलाच्छाया</u> पुरुषं न प्रह्लादयति।

iv. सदाचारः <u>प्राणेभ्यः+अपि</u> विशेषतः रक्षेत्।

**6.अधोलिखितवाक्येषु रेखाङ्कितपदानां समस्तपदं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत- 1×4=4**

i. नराणां कृते **<u>विद्यया समं</u>** चक्षुः न भवति ।

क. विद्यासमम् ख. विद्यसमम्

ग. समविद्या घ. विद्ययासमम्

ii. **<u>व्यासनारदौ</u>** अर्जुनम् अवदताम् ।

क. व्यासाय नारदौ

ख. व्यासस्य नारदः

ग. व्यासः च नारदः च

घ. व्यासौ च नारदः

iii. **<u>अहितं</u>** कर्म कदापि न कर्तव्यम् ।

क. आहितस्य तम्

ख. न हितम्

ग. हितम् न

घ. अस्य हितम्

iv. राजा **<u>पर्वतवनद्रुमैः सहितम्</u>** स्थलं भ्रमणाय गच्छति ।

क. सपर्वतवनद्रुमा

ख. पर्वतवनसहितं

ग. पर्वतवनद्रुमसहितं

घ. सपर्वतवनद्रुमम्

**7.अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्य: चित्वा लिखत-** **1×4=4**

i. राज्ञः घोटकाः कथं **<u>रक्षणीयाः</u>** ?

क. रक्षणी + टाप्

ख. रक्षणी + तल्

ग. रक्ष् + तव्यत्

घ. रक्ष् + अनीयर्

ii. समयः नष्टः चेत् ततः **<u>अधिक + टाप्</u>** हानिः न ।

क. अधिकटा

ख. अधिका

ग. अधिकी

घ. अधिकत्वं

iii. दीयमानं धनं **<u>निधानतां</u>** याति ।

क. निधान + त्व

ख. निधानात + तव्यत्

ग. निधान + तल्

घ. निधान + ठक्

iv. बोधिसत्त्वः बाल्यात् एव अति **बुद्धि** + **मतुप्** आसीत् ।

क. बुद्धिमान्　　　　　　　　　　ख. बुद्धिमती

ग. बुद्धिमत्वं　　　　　　　　　　घ. बुद्धिमन्तः

**8.(अ)वाच्यानुसारं उचितपदैः रिक्तस्थानानि पूरयित्वा अधोलिखितं संवादं पुनः लिखत -** **1×3=3**

राजहंसी - भो! वाचाल! काक! त्वं स्वीयैः क्वणितैः जनजागरणात् अन्यत् किमपि न (i)--------- ।

काकः - जानासि किं ? अहं तु एतादृशः सत्यप्रियः यत् - मातरः(ii) --------- कथयन्ति ।

राजहंसः - शृणोति किं ? यत् (iii)------- सर्वदा तव विषये गीयते ।

बकः - हे! राजहंस! किं ते महत्त्वं ? अहमेव अत्र वृष्टेः अभिनन्दनं करोमि ।

मञ्जूषा -

| जनैः , शिशून ,करोषि |
|---|

**अथवा**

**(आ) वाच्यानुसारं उचितपदैः रिक्तस्थानानि पूरयित्वा वाक्यानि पुनः लिखत-**

(i) वन्यमृगाः कदाचित् ग्रामं नगरं वा (प्र+विश्)-------- ।

(ii) सर्वप्रथमं सर्वैः अपि (जन) ----- इन्द्रियाणि वशे कर्तव्यानि ।

(iii) पर्यटनाधिकारी प्रसिद्धस्थलानां ( सूची ) -------- दर्शयति ।

**9. कालबोधकशब्दैः छात्रावास-छात्राणां दिनचर्यां पूरयत-** **1×3=3**

(i) छात्राः प्रभाते -------(5:30) वादने उत्थाय स्नानं कुर्वन्ति ।

(ii) --------(6:15) वादने मिलित्वा ईश्वरं प्रार्थयन्ति ।

(iii) ततः पृथक् पृथक् उपविश्य पठन्ति -----(7:45)वादने च खादन्ति |

**10.मञ्जूषायां प्रदत्तैः उचितैः अव्ययपदैः अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत** **1×4=4**

(i) यथा चित्ते अवक्रता भवति ------ वाचि अपि सा अवक्रता भवेत् |

(ii) सर्वः अपि आत्मनः श्रेयः प्रभूतानि सुखानि ----- इच्छति |

(iii) ------ प्रश्नोत्तरमाध्यमेन भवतां प्रश्नानां उत्तरं ददामि |

मञ्जूषा -

| इदानीम् , तथा , च |
|---|

**11.अधोलिखितवाक्येषु रेखाङ्कित अशुद्धपदाय उचितपदं चित्वा वाक्यानि पुनः लिखत-** **1×3=3**

(i) **सा** हेतुः सर्वविद्यानां धर्मस्य च धनस्य च |

(क) ताः (ख) सः

(ग) तत् (घ) तानि

(ii) शक्रः **एकं** चक्षुषः दानं इच्छति |

(क) एकः (ख) एका

(ग) त्रि (घ) एकस्य

(iii) राजगृहे बालवाहनयोग्यं मेषयूथम् **आसन्** |

(क) भवन्ति (क) भविष्यन्ति

(ग) आसीत् (घ) सन्ति

**'घ' भागः**

**पठितावबोधनम्-(30 अङ्का:)**

**12.अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत - 5**

कस्मिंश्चित् नगरे चन्द्रो नाम भूपतिः प्रतिवसति स्म। तस्य पुत्राः वानरक्रीडारताः वानरयूथं नित्यमेव विविधैः भोज्यपदार्थैः पुष्टिं नयन्ति स्म। तस्मिन् राजगृहे बालवाहनयोग्यं मेषयूथम् आसीत्। तेषां मेषाणां मध्ये एको मेषः जिह्वालोलुपतया अहर्निशं महानसं प्रविश्य यत् पश्यति तद् भक्षयति। ते च सूपकाराः यत्किञ्चित् काष्ठं, मृण्मयं भाजनं कांस्यताम्रपात्रं वा पश्यन्ति तेन तम् आशु ताडयन्ति स्म। मेषस्य सूपकाराणां च कलहम् अवेक्ष्य नीतिविदाम् अग्रणीः वानरयूथपतिः अचिन्तयत्- 'एतेषां कलहो न वानराणां हिताय।' एवं विचार्य स यूथपः सर्वान् कपीन् आहूय रहसि अवदत् - "सूपकाराणां मेषेण सह एषः कलहः नूनं भवतां विनाशकारणं भविष्यति|" इति

**I. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)** **½×2=1**

(i) क: नीतिविदाम् अग्रणी: अस्ति?

(ii) मेष: कुत्र प्रविशति?

(iii) सूपकारा: कं आशु ताडयन्ति?

**II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)** **1×2=2**

(i) यूथपति: रहसि किम् अवदत्?

(ii) सूपकारा: मेषं केन ताडयन्ति स्म?

(iii) मेषयूथं कुत्र आसीत् ?

**III. अ)निर्देशानुसारम् उत्तरत-** **1×2=2**

(i) "कस्मिंश्चित् नगरे चन्द्रो नाम भूपतिः प्रतिवसति स्म।" अस्मिन् वाक्ये क्रियापदं किम्?

(ii) "सर्वान् कपीन्" अनयो: पदयो: विशेषणपदं किम्?

अथवा

**आ) निर्देशानुसारम् उत्तरत-** **1×2=2**

(i) "एकान्ते" इत्यर्थे गद्यांशे किं पदं प्रयुक्तम्?

(ii) "ताडयन्ति स्म" अस्य अस्य कर्तृपदं पदं किम्?

**13.अधोलिखितपद्ये पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत - 5**

अथ केन प्रयुक्तोऽयं पापं चरति पूरुषः ।
अनिच्छन्नपि वार्ष्णेय! बलादिव नियोजित:
काम एषः क्रोध एष रजोगुणसमुद्भवः ।
महाशनो महापाप्मा विद्धयेनमिह वैरिणम्॥

**I. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) ½×2=1**

(i) क: पापं चरति?
(ii) कस्मात् गुणात् काम: जायते?
(iii) कं वैरिणं विद्धि?

**II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) 1×2=2**

(i) नर: पापं कथं चरति?
(ii) क: महाशन: अस्ति?
(iii) अर्जुन: श्रीकृष्णं किं पृच्छति?

**III. अ)निर्देशानुसारम् उत्तरत- 1×2=2**

(i) "चरति" इति क्रियापदस्य कर्तृपदं पद्यांशे किं प्रयुक्तम्?
(ii) "रजोगुणसमुद्भवः" इति विशेषणपदस्य विशेष्यपदं किम्?

अथवा

**आ)निर्देशानुसारम् उत्तरत- 1×2=2**

(i) "बहुभोजि" इति पदस्य पर्यायपदं पद्यांशे किं प्रयुक्तम्?
(ii) "मित्रम्" इत्यस्य विलोमपदं किं अत्र प्रयुक्तम्?

**14. अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -5**

श्यामा - महोदय! अत्रत्यजनजातीनां कानि प्रमुखानि आजीविका-साधनानि ?

पर्यटनाधिकारी- कृषिः शिल्पकला वनसम्पद् चैव एतेषां प्रमुखानि आजीविकासाधनानि ।

रविः- मान्यवर ! अस्य प्रदेशस्य प्रमुखाः उत्सवाः के ?

पर्यटनाधिकारी - साधु पृष्टम्। अत्र अनेके प्रमुखोत्सवाः । 'वाङ्चो' जनजातीनां प्रमुखं पर्व 'ओरिया' इति अस्ति। एतत् तु फरवरी इति मासे मान्यते। अस्मिन् अवसरे कृषिभूमिपूजनं सेतुनिर्माणं च सामाजिकं कार्यं क्रियते। 'मोपीन' इति अपि कृषिपर्व अस्ति। देवानामपि देवः 'मोपीन' इति कथ्यते। 'होली' सदृशम् एव पर्व इदम् । जनाः परस्परं मुखे कपोले च शालिचूर्णं लिम्पन्ति । इदम् 'अप्रैल' इति मासे मान्यते । 'ओणम्' पर्वसमं 'साडकेन' एकम् अन्यत् पर्व अस्ति। लामासम्प्रदायस्य 'लोसर' इति प्रमुखं पर्व अपि 'फरवरी' इति मासे सम्पद्यते ।

**I. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)** **½×2=1**

(i) देवानामपि देवः कः ?

(ii) अप्रैल-मासे किं पर्व मान्यते?

(iii) 'वाङ्चो' जनजातीनां प्रमुखं पर्व किम्?

**II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)** **1×2=2**

(i) अरुणाचले कानि प्रमुखानि आजीविकासाधनानि सन्ति?

(ii) 'ओरिया' - पर्वणः अवसरे किं किं सामाजिकं कार्यं क्रियते?

(iii) मोपिन-पर्वणि जनाः किं कुर्वन्ति?

**III. अ)निर्देशानुसारम् उत्तरत-** **1×2=2**

(i) "प्रमुखानि आजीविकासाधनानि" अनयोः पदयोः किं विशेष्यपदम् अस्ति?

(ii) "लिम्पन्ति" इति क्रियापदस्य कर्तृपदं नाट्यांशे किं प्रयुक्तम्?

अथवा

**आ)निर्देशानुसारम् उत्तरत-** **1×2=2**

(i) "उत्सवः" इत्यस्य पर्यायपदं नाट्यांशे किं प्रयुक्तम्?

(ii) "इदम् 'अप्रैल' इति मासे मान्यते" अस्मिन् वाक्ये कर्तृपदं किम्?

15. रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत - 5×1=5

(i) **रागस्य** विलोमः त्यागः ।

(ii) **नेपथ्ये** काकध्वनिः श्रूयते ।

(iii) सूर्योदये **तमः** नश्यति ।

(iv) कामस्य नाशाय **इन्द्रियाणि** वशे करणीयानि ।

(v) **आचार्यः** पुत्रं सावधानम् अकरोत् ।

**16.(अ)मञ्जूषातःपदानि चित्वा अधोलिखित श्लोकस्य अन्वयं पूरयित्वा पुनः लिखत-** **4×½=2**

**श्लोकः** - क्रन्दनं वर्धते तस्य नान्तं समधिगच्छति ।
व्यसनं प्राप्य यो मोहात् केवलं परिदेवयेत् ॥

**अन्वयः**:- (i)------ व्यसनं प्राप्य (ii)-------- केवलं परिदेवयेत् , तस्य (iii)-------- वर्धते अन्तं (च) न (iv)-------------- ।

मञ्जूषा-

| |
|---|
| क्रन्दनं , यः , समधिगच्छति , मोहात् |

**अथवा**

**(आ) मञ्जूषायाःसाहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनःलिखत-**

**श्लोकः** - जलबिन्दुनिपातेन क्रमशः पूर्यते घटः।
स हेतुः सर्वविद्यानां धर्मस्य च धनस्य च॥

**भावार्थः**:- घटं जलेन पूरयितुं जलधारा एव (i)----------- इति नास्ति , जलबिन्दूनां निरन्तर-पतनेन अपि घटः (ii)------------ पूर्णतां प्राप्नोति । एवमेव अनेन उदाहरणेन वयं सर्वाः (iii)--------, धर्मं , धनं च निरन्तर-प्रयत्नेन शनैः शनैः अधिगन्तुं (iv)--------- ॥

मञ्जूषा -

| |
|---|
| विद्याः, शक्नुमः, आवश्यकी, क्रमशः |

**17.अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुकूलं उचितार्थं चित्वा लिखत-** **4×1=4**

(i) अहं भवतां **<u>जिज्ञासां</u>** शमयितुम् इच्छामि |

(क ) गन्तुम् इच्छाम् (ख) ज्ञातुम् इच्छाम्

(ग ) गातुम् इच्छाम् (घ) पिपासाम्

(ii) विमूढधीः धर्मप्रदां वाचं त्यक्त्वा **<u>परुषां</u>** एव वदति |

(क) कठोराम् (ख) कोमलाम्

(ग) प्रयुक्ताम् (घ) दुःखम्

(iii) दम्पती माणिक्यानाम् **<u>आभया</u>** भासमानं गृहम् अपश्यताम् |

(क) अग्निना (ख) सूर्येण

(ग) सहसा (घ) प्रकाशेन

(iv) किम् इदं **<u>घोरम्</u>** आपतितम् ।

(क) पत्रम् (ख) दायित्वम्

(ग) सरलम् (घ) भयङ्करम्

**18. मञ्जूषा पदसहायतया रिक्तस्थानानि पूरयित्वा अधोलिखितकथां उत्तरपुस्तिकायां लिखत -** **8×½=4**

दुष्टबुद्धिः तु तयोः वार्तां श्रुत्वा झटिति एव ----1----- क्षेत्रं गत्वा अश्वत्थमूलं खनित्वा सुवर्णकलशं प्राप्तवान् | यदा सः ---2---- आवरणम् अपसारयति तदा एकः भयङ्करः विषधरः फूत्कारं करोति स्म | भीतः ----3---- कलशं पुनः आवृत्य तं च आदाय तेन एव सर्पेण ----4---- प्रच्छन्नभाग्यं मारयितुं इच्छन् तस्य गृहं गत्वा भित्तौ सन्धिं प्रकल्प्य तन्मध्यतः कलशं गृहस्य अन्तः ----5----- | दैवगतिः विचित्रा आसीत् | पतितात् ----6----- विषधरः बहि निर्गत्य दुष्टबुद्धिम् एव दष्टवान् | कलशपातशब्देन प्रबुद्धौ तौ दम्पती ----7----- आभया प्रकाशमानं निजगृहं आश्चर्येण अपश्यताम् | अनेन ज्ञायते यत् - यः पापमेव करोति तस्य दुःखं सुनिश्चितम् | यः च पुण्यमेव ----8---, तस्य सुखं सुनिश्चितम् ||

| |
|---|
| दुष्टबुद्धिः ,मित्रं, करोति ,क्षिप्तवान् ,कलशात् ,घटस्य ,प्रच्छन्नभाग्यस्य ,प्रचुरमणिमाणिक्यानां |